.. gurUvaraprArthanApa.ncharatnastotram ..

# ॥ गुरूवरप्रार्थनापंचरत्नस्तोत्रम् ॥

यं विज्ञातुं भृगुः स्वं पितरमुपगतः पंचवारं यथाव-
ज्ज्ञानादेवामृताप्तेः सततमनुपमं चिद्विवेकादि लब्ध्वा ।
तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्ता-
ऽनन्ताद्वैतप्रतीतं न कुरू कितवतां पाहि मां दीनबन्धो ॥ १॥
यस्मान्नश्यस्य जन्म-स्थिति-विलयमिमे तैत्तिरीयाः पठन्ति
स्वाविद्यामात्रयोगाद् सुखशयनतले मुख्यतः स्वप्नवच्च ।
तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्ता-
ऽनन्ताद्वैतप्रतीतं न कुरू कितवतां पाहि मां दीनबन्धो ॥ २॥
या वैदांतैकलभ्यश्रुतिषु नियमिनस्तैत्तिरीयैश्च काण्वै-
रन्यैरप्यानिषेकादुदयपरिमितं चारूसंस्कारभाजाम् ।
तस्मै तुभ्यं नमः श्री हरिहरगुरवे सच्चिदानन्दमुक्ता-
ऽनन्ताद्वैतप्रतीतं न कुरू कितवतां पाहि मां दीनबन्धो ॥ ३॥
यस्मिन्नेवावसन्नाः सकलनिगमवांमौलयः सुप्तपुंसि
प्रोक्तं तन्नाम यद्व निजमहिमगत-ध्वान्त-तत्कार्यरूपे ।
तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्ता-
ऽनन्ताद्वैतप्रतीतं न कुरू कितवतां पाहि मां दीनबन्धो ॥ ४॥
चित्वात्संकल्पपूर्वं सृजति जगदिदं योगिवन्मायया यः
स्वात्मन्येवाद्वितीये परमसुखदृशि स्वप्नवद् भूम्नि नित्ये ।
तस्मै तुभ्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्ता-
ऽनन्ताद्वैतप्रतीतं न कुरू कितवतां पाहि मा दीनबन्धो ॥ ५॥
॥ इत्यच्युतयतिविरचिं गुरूवरप्रार्थनापंचरत्नस्तोत्रं सम्पूर्णम् ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001